णि मंत्रवित्॥ स्वाः पीठशक्तिर्विन्यस्य न्यसेत्पीठमनंतिजं॥ हृदि न्यस्तानंतमुख्ये देवान्नामत्रयोत्तरं॥ प्रत्याधा
रत्वमुक्तं पूर्वं पूर्वस्य सप्तमैः॥ इति देहमयेपीठे ध्यायेत्स्वाभिष्टदेवतां॥ तत्तन्मुद्राः प्रदर्श्यार्थक्रियन्मानसपू
जनं॥ १६४॥ अथ यिततो देवं मंत्रेणानेनतन्मनाः॥ ॐ स्वागतं देव देवेशसंनिधौ भव केसव॥ गृहाणमानसीं पू
जां यथार्थपरिभाषितां॥ केसवेति पदस्थानेकार्यपुरोन्यदेवते॥ मनसा पूजयित्वेवं क्षणं तज्जतमानसः॥ स्थि
त्वा मूलमजं विद्वान्जयेद्दशोत्तरं शतं॥ जपं निवेद्य देवाय स्थापयेद्दर्घप्रत्तमो॥ वाद्यसंपूजनायाथ तत्प्रकारो
निगद्यते॥ १६६॥ ॥इति॥ स्त्रानादिकथनं नामैकविंशतिं रंगः॥ ॥स्वधामाथेतुषड्कोणं वृत्तभूपुरवेष्टि
तं॥ कृत्वाग्निकोणमूर्ध्वाग्रं स्तंभयेद्धृदयमुद्रया॥ पुष्पाक्षतैः षडंगानि तत्राभ्यर्च्यादिमुपूजयेत्॥ अस्त्रक्षा
लितमाधारं तत्र ध्यात्वा मनुं जपेत्॥ मंवह्निमंडलायेति ततो दशकलात्मने॥ अमुकार्घपात्रांतेसनायन
मः इति॥ चतुर्विंशतिवृत्तोयि माधारस्थापनेमनुः॥ आधारे पूर्वकाष्ठादिदशार्वित्यावकीः कलाः॥ स्व
मंत्रक्षालितं शंखं स्थापयेन्मनुमुच्चरन्॥ अंसूर्य्यमंडलायेति शतोपिकलात्मने॥ अमुकार्घपात्राय

नमोंतस्त्र्यक्षिवर्णावाह॥शंखस्थापनमंत्रोयंतारःकामोमहाजलः॥वरायवर्मफट्स्वाहापांचजन्यायहुम
नुः॥शंखस्यविंशत्यर्णाख्यस्तेनप्रक्षालयेच्छुभं॥कलाद्वादशसूर्यस्यशंखोपरियजेत्क्रमात्॥विलोममा
तृकामूलेविलोमंचयजेज्जलैः॥आसूर्यमंडलेध्यातंतत्रार्द्धेदेवीःकलाः॥उसोममंडलायांतेषोडशांतेकलात्मने॥अमृतायेतिहृन्मंत्रआर्घ्यपूजने॥आकृष्टेतत्रतीर्थानितन्मंत्रसृणिमुद्रया॥१०॥रविमंडलतःस्वीयहृत्देवमथाहृयेत्॥अस्त्रकृत्वोजपन्मूलंस्पृष्ट्वाजलमनन्यधीः॥अस्त्रविन्यस्यचांगानिहृदासंपूजयेद्यथः॥मूलंजपेदस्त्रशस्त्राश्चाह्यन्मत्यमुद्रया॥संरक्षेदस्त्रमंत्रेणाकोटिकामुद्रयाजलं॥मुद्रयाचावगुंठ्यावर्मणाचावगुंठयेत्॥अमृतीकृत्यगोमुद्रांकुर्वन्नमृतबीजतः॥संरोधिन्यासंनिरुध्यात्रमुद्राःप्रदर्शयेत्॥शंखमोशालचक्राख्याःपरमीकृत्यतत्पुनः॥महामुद्रांविरचयन्योनिमुद्रांचदर्शयेत्॥कल्पमंत्रेणालिनीचरामेगरुडमुद्रिका॥शंखाद्वाक्षिराहिभागेप्रोक्षणीपात्रपूरणं॥कृत्वार्घंद्वित्रिनिःक्षिप्यतेनोक्षेद्विर्निजांतनं॥प्रजपेन्मूलगायत्रीपूजावस्त्रचयंतथा॥पाद्यावमनपात्रेचदध्यार्घ्यस्यचोत्तरे॥एवंसर्वविधिःप्रोक्तःसर्वसाधारणोमया॥विहायशंकरंसूर्यमर्घ्येशंखःप्रशस्यते॥हेमरूप्योडंबराजुरी

निहतमृद्भवं॥पात्रानाशयद्यपत्रेवास्मृतंपाद्यादिभाजने॥अशक्तावर्घपात्रेणापद्मादीनिनिवेदयेत्॥अंतर्यागंततःकुर्यात्पीठंहेमयेसुधीः॥न्यासस्थाने सुमंडूकमुख्यारुगंधादिभिर्यजेत्॥पीठमंत्रोतमत्रेज्याहृदयेसेष्टदेवता॥कुंडलीमथचोत्थाप्यद्वादशांतेपरंजयेत्॥ततस्त्वामृतधाराभिःप्रीणयेत्स्वेष्टदेवतां॥जपंकृत्वानिवेद्यास्मैमनसानविसर्जयेत्॥मूर्द्धिहृत्यास्यगुह्येषुतनौपुष्पांजलीक्षिपेत्॥अंतर्यागंविधायेत्थंवाह्यपूजनमाचरेत्॥अंतर्यागंबहिर्यागोगृहस्थःसर्वथाचरेत्॥आद्यमेवब्रह्मचारीवानप्रस्थोयतिस्तथा॥वर्द्धयोप्रभिषेकंविदधीतकमनन्यधीः॥प्राणानायस्यमूलेनवामेगुरुवयंनमेत्॥दक्षिणोवगरोशानेपीठपूजामथाचरेत्॥स्वरादिलिखितेयंत्रेयद्वाचंस्तनिर्मितं॥मंडूकाद्यरतत्वांतंदिग्मध्येपीठशक्तयः॥पृथिव्यंतरंपूज्यःश्रीराद्यिमधवेश्रियां॥इक्षुसिंधुर्गरोशेस्यादन्यत्रामृतसागरः॥अग्निराक्षसवाद्वीशकोणेधर्मादयःस्मृताः॥इंद्रकीनाशवरुणसोमाशामुभयादिकाः॥धर्मादिपूजनेप्राचीनथैवावरणार्चनं॥पूजकस्यपुरःकल्प्याशक्रादिस्वयथास्वकं॥श्वेतारक्तास्तुणापीताश्यामरक्तासितासिताः॥रक्तावराभयधराःध्येयास्युःपीठशक्तयः॥शालग्रामेमणौयंत्रेनित्यपूजांसमाचरेत्॥हेमादिप्रतिमायांवास्थापितायांयथाविधिः॥

अंगुष्ठाद्वितस्यंतमानासाप्रतिमायुहे॥पूज्यानस्थाभिन्नावा नोर्द्धाधोहस्यवक्रिका॥लिंगंवालक्षरणो
पेतं तत्रावाहनमाचरेत्॥मूलमुच्चार्य्यहृत्यात्कुशमाववर्त्तमानामहः॥द्वारेणाक्षरंध्रस्यनासारंध्रविनिर्गतम्
॥पुष्पांजलौमातृकाद्वेयोजयित्वाविनिक्षिपेत्॥सूत्रेपुष्पांजलिंबेतद्वावाहनमुदीरितं॥शालग्रामेस्थिरांयांवा
नावाहनविसर्जने॥आह्वानाद्युपचारेषुश्लोकान्नशंभूदितान्पठेत्॥आत्मसंस्थमजंशुद्धंत्वामहंपरमेश्वर
॥अररापामिवहव्योसंमूर्त्तावावाह्याम्यहं॥३॥पंचायतनपक्षेतुमध्येविष्णुंततोचरेत्॥अग्निर्भूतवायवे
शानेषुगणानायकं॥रवींशेवांशेवंमध्येगणेशस्योक्तिवांशेवां॥रवौविष्णुंरवौमध्येविघ्राजनगजेश्वरान्॥
भवान्यांमध्यसंस्थायामीशविघ्नार्कमाधवान्॥हरेमध्यगतेसूर्य्यगणेशगिरिजाक्रमात्॥संपूज्याद्वौमध्य
गतंगणेशादितोयजेत्॥गणेशेमध्यसंस्थेतुपूजयेद्भास्करादितः॥कांडानुसमयेनात्रपूजाप्रोक्तामनी
षिभिः॥विधायावाहनंचेत्थमावाह्यानुमुद्रया॥संस्थापन्यास्थापयेत्तंमूलंतेश्लोकमुच्चरन्॥तवेयंमहि
मामूर्त्तिसस्यांत्वांसर्वगेप्रभो॥भक्तिस्त्वेहसमाकृष्टंदीपवत्स्थापयाम्यहं॥गुरुःकार्यंभवान्यादौश्लोकेनावाह
नादिषु॥मूलंश्लोकोपठन्कुर्याद्दासनंचोपवेशनं॥ॐसर्वांतर्यामिणोदेवसर्ववीजमयंप्रभो॥स्वात्मस्थाय

परंशुद्धमासनंकल्पयाम्यहं॥अस्मिन्वरासनेदेवसुखासीनोभवेश्वरात्वंप्रसीदस्व
रमेश्वर॥मूलश्लोकोततःकुर्यात्संनिधानंस्वमुद्रया॥ॐअनन्यातवदेवेशमूर्त्तिशक्तिरियंप्रभो॥सांनि
ध्यंकुरुतस्यात्वंभक्तानुग्रहतत्परः॥पठन्मूलंतथाश्लोकंसंनिरुध्यात्स्वमुद्रया॥आज्ञयातवदेवेशकृपां
भोधेगणाधुधो॥आत्मानंदेकतृप्तंत्वांनिरुणाध्यितगुरो॥मुद्रयासंमुखीकुर्यान्मूलंश्लोकंचसंपठन्॥ॐ
अज्ञानाद्दुर्मनस्त्वाद्वाविकल्यात्साधनस्यवा॥यद्दपूर्णंभवेत्कृत्यंतदप्यभिमुखोभव॥कुर्वीतमूलश्लोका
भ्यांप्रार्थ्यामुद्रयार्थनां॥ॐदत्तापीयूषवर्षिणापूरयन्यज्ञविग्रहः॥मूर्त्तावायज्ञसंपूर्त्तेःस्थितोभवम
हेश्वर॥न्यसेत्षडंगंदेवांगेसकलीकरणोसुधी॥मूलंश्लोकंपठन्कुर्याद्देवगणंस्वमुद्रया॥ॐअभक्तवाङ्मन
श्चक्षुश्रोत्रदरायनद्युते॥स्वतेजःपंजरेणाभुवेष्टितोभवसर्वतः॥गोमुद्रयामृतीकृत्यविदध्यात्परमीकृतीं॥
महामुद्रांविरचयन्ततःस्वागतमाचरेत्॥मूलमंत्रंतथाश्लोकेपठंस्तत्परमामसः॥यस्यदर्शनमिच्छंतिदेवाः
स्वामिप्रसिद्धये॥तस्मैतेपरमेशायस्वागतंस्वागतंचमे॥ततःसुस्वागतंकुर्यान्मूलश्लोकौसमुच्चरन्॥ॐकृ
तार्थोनुगृहीतोस्मिफलंजीविवितंमम॥आगतोदेवदेवेशसुस्वागतमिदंपुनः॥त्वयामाकविघ्नकांताबुद्ध

मं·म
१११
द्वा·विं
यू

र्वाः पाद्यजलेक्षिपेत्॥ मूलश्लोकनमोमंत्रैः पाद्यंपादौ विजेर्पयेत्॥ ॐ यद्भक्तिलेषसंपर्कात्परमानंदसंभ
वः॥ तस्मैतेवरणाद्वायपाद्यंसुधायकल्पये॥ लवंगजातिकक्कोलंप्रक्षिप्यावमनीयकं॥ दद्याद्दावमनंवक्त्रे
मूलश्लोकसुधाक्षरैः॥ ॐ वेदानामपिवेदाय देवानांदेवतात्मने॥ आचमंकल्पयामीशसुधानांसुहितेतवे॥
अर्घपात्रेक्षिपेद्दूर्वातिलदर्भाग्रसर्षपान्॥ यवपुष्पाक्षतान्गंधंसूर्द्रतेनार्घमाचरेत्॥ मूलश्लोकशिरो
मंत्रैर्देवस्यमनुवित्तमः॥ तापत्रयहरंदिव्यंपरमानंदलक्षणं॥ तापत्रयविनिर्मुक्तंतवार्घंकल्पयाम्यहं॥ पात्रे
नुमधुपर्कस्यदद्याज्जपमधुक्षिपेत्॥ मूलश्लोकसुधामंत्रैर्दद्यात्तवदनेप्रभो॥ ॐ सर्वकालुव्यहीनायपरि
पूर्णसुखात्मने॥ मधुपर्कमिदंदेवकल्पयामिप्रसीदमे॥ पुनराचमनंदद्यान्मूलंश्लोकांतरंपठन्॥ ॐ उद्धि
स्रोप्यसुविर्वापियस्यस्मरणमात्रतः॥ शुद्धिमाप्नोतितस्यैतेपुनराचमनीयकं॥ स्नानवस्त्रोपवीतांतेनैवेद्यां
तेपितत्स्मृतं॥ माद्याद्दिव्याभावेसुतत्स्मरन्नक्षतान्क्षिपेत्॥ गंधतैलंततोदद्यान्मूलंश्लोकंसुधीःपठन्॥ ॐ
स्त्रेहंगृहाणस्त्रेहेनलोकनाथमहाशय॥ सर्वलोकेषुसुधात्मन्दद्मिस्त्रेहमुत्तमं॥ हरिद्रायेक्षसुवर्णस्त्रा
पयेदुभयंपठन्॥ ॐ परमानंदबोधाब्धिनिमग्ननिजमूर्तये॥ सांगोपांगमिदंस्नानंकल्पयाम्यहमीशते॥ ततः

रामः
१११

22

सहस्त्रंशंखेनशतंवाशक्तितोपिवा॥ गंधयुक्तोदकैरीशमभिषिंचेन्मनुंजपन्॥ पठन्मूलंततःश्लोकौदद्याव
स्त्रोत्तरीयके॥ ॐ मायाचित्रपटच्छन्नभिजगुह्योरुतेजसे॥ निरावरणविज्ञानवाससेकल्पयाम्यहं॥ ॐ यमा
श्रित्यमहामायाजगत्संमोहिनीसदा॥ तस्मैतेपरमेशायकल्पयामुत्तरीयकं॥ ॥ पीतंविष्णोसितंशंभोरक्तंविघ्ना
र्कशक्तिषु॥ सच्छिद्रंमलिनंजीर्णंत्यजेत्तेलादिदूषितं॥ ॥ उपवीतभूषणानिप्रयच्छेदुभयंपठन्॥ ॐ यस्यशक्तित्र
येरोदंसंप्रोतमखिलंजगत्॥ यज्ञसूत्रायतस्मैतेयज्ञसूत्रंप्रकल्पये॥ ॐ स्वभावसुंदरांगायनानाशक्त्याश्रया
यते॥ भूषणानिविचित्राणिकल्पयाम्यमरार्चितः॥ मूलमंत्रप्रपूरितमेकैकमातृकाक्षरं॥ विन्यसेद्देवतांगेषुयो
गोयंलोकमोहनः॥ कनिष्ठयापात्रसंस्थंपूर्ववज्जपमर्पयेत्॥ ॐ परमानंदसौभाग्यपरिपूर्णाद्विगंतर॥ गृहाणाप्र
रमंगंधंकृपयापरमेश्वर॥ ततःकनिष्ठांगुष्ठाभ्यांगंधमुद्रांप्रदर्शयेत्॥ मूलंश्लोकंपठन्नानापुष्पाणिविनिवेदये
त्॥ ॐ सुरीयवनसंभूतंनानागुणमनोहरं॥ अमंदसौरभंपुष्पंगृह्यतामिस्मुत्तमं॥ तर्जन्यंगुष्ठयोगेनपुष्पमुद्रां
प्रदर्शयेत्॥ अक्षतानर्कधत्तूरौविल्वेभेवापयेत्सुधीः॥ बंधुकंकेतकीजंतुकेसरंकुटजंजपां॥ शंकरेनार्पयेद्विद्वा
न्मालतीयूथिकामपि॥ शक्रोद्भवार्कमंदारान्मालूरंतगरंखवौ॥ विनायकेतुतुलसीनार्पयेज्जातुविद्वुधः॥ श्वे

तंपीतंहरेरिष्टंरक्तंरविगरोत्रयोः॥ मिर्गंधंकेशकीटादिदुष्टंचोग्रगंधकं॥ मलिनंतनुसंस्पृष्टमाघ्रातंस्व
विकाशितं॥ अशुद्धभाजनानीतंस्वात्वानीतंचयाचितं॥ भक्तंपर्युषितंरूक्षंभूमिगंनार्पयेत्सुमां॥ चंपकंकमलं
त्यक्त्वाकलिकामपिवर्ज्जयेत्॥ कुरंटकंकांचनारंवर्ज्जयेद्वृत्तीयुगं॥ पुष्पंपत्रंफलंदेवेनप्रदद्याद्घोमुखं॥
पुष्पांजलौनतद्दोषस्तथापर्युषितस्यच॥ तुलसीबकुलोद्वस्यश्चंपकश्चैरोजिनी॥ विल्वकल्हारदमनास्त-
थामरुवकःकुशाः॥ इर्वाहिवहत्यपामार्गविष्णुक्रांतामनिकुमः॥ धात्रीयुतानांमेतेषांपत्रैःकुर्यात्सुपूर्व
नं॥ जंबूदाडिमजंबीरमिंमिरी॥ बीजपूरकाः॥ रंभाधात्रीबदरीरसालःपनसोपिवा॥ एषांफलैर्यजेद्देवंतुल
सीजुहरोःप्रिया॥ सुवर्णपुष्पंतुलसीमेवनिर्माल्यतांव्रजेत्॥ पुष्पपूजांविधायेत्थंकुर्याद्धावरणार्चनं॥ अंगाहि
दिक्ष्वहेयंतंतोधूपादिकंचरेत्॥ अग्निनैर्ऋत्यवायव्यैशाकोणेषुहृदयंशिरः॥ शिखांकवचमाराध्यनेत्रम
ग्रेप्रपूजयेत्॥ दिक्ष्वस्त्रमंगदेव्यस्ताध्यानव्यावामलोचनाः॥ सिताश्वेताःसितासितस्वोरक्ताःकृष्णाभयान्विताः॥
स्वदिक्षुप्रयजेद्दिक्यान्जाभिहेत्यादिसंयुताः॥ ताराद्विजवीजाद्यास्तत्प्रयोगोधुनोच्यते॥ तारंबीजमथ
नायामुकाधिपतयेततः॥ सायुधायसवाहांतेनायसांतेपरीतिचा॥ धारायांतेमशक्तीतिकायामुकपदंततः॥

॥पार्थहायनमोंतोयंदिक्यालानांमनुस्मृतः॥ इंद्रायेतिपदस्थानेवज्रायुधपदंस्मरेत्॥ अद्यामुकपदस्था
नेक्रमाज्जातीर्वदेत्सुधीः॥ सुरतेजःप्रेतरक्षःसलिलप्राणतारकाः॥ भूताहिलोकाविज्ञेयाआशापाल
कजातयः॥ पार्थिवहास्त्रमंत्रमुकस्थानेस्यात्वेष्टदेवता॥ बीजानिपूर्वमुक्तानिवाहनान्यायुधानिते॥ या
तुतोयपयोर्मध्येनंतंपूर्वेशायोसुकं॥ प्रत्यावृत्तिक्षिपेद्देवेपुष्पंमंत्रमिमंजपन्॥ ॐअभीष्टसिद्धिंमेदेहिश
रणागतवत्सल॥ भक्त्यासमर्पयेतुभ्यमिदमावरणार्चनं॥ आह्वानाद्युपचारेषुप्रत्येकंपुष्पपाद्यसी॥ दत्वा
प्रक्षाल्यचक्रंसुपचारांतस्वरेत्॥ धूपपात्रस्थितांगारेक्षिप्त्वागुरुपरास्किं॥ पात्रमंत्रेणसंप्रोक्षदद्यात्पु
ष्पंसमर्चयेत्॥ संस्पृश्यवामतर्ज्जन्यामूलंश्लोकंवसंपठेत्॥ ॐवनस्पतिरसोपेतोगंधाढ्यःसुमनोहरः॥
आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥ सांगायसपरीवारायतेवायतेदेवता॥ धूपंसमर्पयामितिनमो
तंमंत्रमुच्चरन्॥ शंखांबुप्रक्षिपेद्धूमोधूपमुद्रांप्रदर्शयेत्॥ तर्ज्जन्यंगुष्ठयोगेनघंटामर्वेल्वमंत्रतः॥ जगद्ध्व
निमंत्रमातः स्वाहांतःसदशाक्षरः॥ वाद्यन्चा[illegible]महसेतांकीर्त्तयन्देवतागणान्॥ धूपयेद्दशहस्तेनदे
वतानामिदेशतः॥ जलंपुष्पांजलिंदद्याद्दीपदानमपीदृशं॥ वामभध्यमयास्पर्शोमूलश्लोकस्यकीर्त्तनं॥

मं॰ म
११३
द्वा॰ विं
पू

ॐ अप्रकाशो महादीपः सर्वतस्तिमिरापहः॥ स बाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यतां॥ धूपस्थाने दीपप
र्दमध्यमांगुष्ठयोगतः॥ दीपमुद्रा दर्शनिवत्तद्दानं नेत्रदेशतः॥ श्लमपक्षेलुवर्तीनां विषमावर्तिकामता॥ घृ
तदीपो दक्षिणोस्यात्तैलदीपस्तु वामतः॥ सितवर्तियुतो दक्षे वामांगे रक्तवर्तिकः॥ अत्रान्यद्धूपवद्ज्ञेयं त
तो नैवेद्यमर्पयेत्॥ स्वर्णादिभाजने साज्यशर्करं पायसादिकं॥ परिवेश्य यथाशक्ति प्रोक्षेत्कैरस्त्रमंत्रितैः
॥ चक्रमुद्रामथार्घ्यं प्रोक्षेत्तन्मंत्रितैर्जलैः॥ वायुबीजेनार्कवारं ततस्तज्जातमारुतैः॥ नैवेद्यदोषं संशोष्य
चिंतयेद्दक्षिणोकरे॥ अग्निबीजं तस्पृष्टे वामं करतलं न्यसेत्॥ तं दर्शयित्वा नैवेद्ये तदुत्थेनाग्निना ऽखिलं॥ नैवे
द्यदोषं संदह्य ध्यायेद्वामे करे ऽमृतं॥ तत्स्पृष्टे दक्षिणं हस्तं कृत्वा तत्र प्रदर्शयेत्॥ आप्लाविनं स्मरेद्वीजं वीजोत्था
मृतधारया॥ प्रोक्ष्य मूलेन तत्स्पृष्ट्वा दक्षोमूलमजपेत्॥ दर्शयित्वा धेनुमुद्रां गंधपुष्पैस्तदर्चयेत्॥ देवेपु
ष्पांजलिं दत्त्वा तेजोदेवमुखोत्थितं॥ विचिंत्य वामांगुष्ठेन स्पृष्ट्वा नैवेद्यभाजनं॥ दक्षहस्तेजलिं धृत्वा मूलं श्लोकं
शिरः पठेत्॥ सत्यात्त्वमिति संजुह्य विविधानेकभक्षणां॥ निवेदयामि देवेशानुगायगृहागतं॥ सांगोपे
त्यादिकं प्रोच्य जलमुत्सृज्य भूतले॥ नैवेद्यमुद्रामंगुष्ठानामिकाभ्यां प्रदर्शयेत्॥ सपुष्पाभ्यां कराभ्यां त्रिः

रामः
११३

प्रोक्षेत्तन्मोजभाजनं॥ निवेदमिभवतेजधारो दहविहरो॥ शोडशार्गानि निप्रोच्य थामृतं प्रदर्शयेत्॥ वामहस्ते
नपद्माभ्यां प्राणाद्या दक्षिणोमनुः॥ कनिष्ठानामिकांगुष्ठैर्मुद्रा प्राणस्य कीर्तिता॥ तर्जनीमध्यमांगुष्ठैरपानस्य
मुद्रिका॥ अनामामध्यमांगुष्ठैः समानस्यमुदास्मृता॥ तर्जन्यनामामध्याभिः मांगुष्ठाभिश्च तुर्थिका॥ सर्वाभिः
सासमानस्य प्राणाद्यान्दंडिवान्विनाः॥ तारपूर्वान्जपन्मुद्राः प्राणादीनां प्रदर्शयेत्॥ ततो जवनिकां धृत्वा प्र
क्षेत्राद्यैरदं पठेत्॥ पद्मं शालीभक्तमिति मूलमंत्रं ससप्रथा॥ प्रतिसीरामयाकृत्य दद्यात्श्लोकं पठन्जलं॥ ॐ सम
स्तदेवदेवेशसर्वतृप्तिकरं परं॥ अखंडानंदसंपूर्णगृहाणजलमुत्तमं॥ स्थंडिलेग्निमुपाधाय वैश्वदेवक्रियां च
रेत्॥ मूलेन वीक्ष्य वास्त्रेणाकृत्वा प्रोक्षणताडनं॥ कुशैस्तद्वर्मणाभ्यक्ष्य पूर्ववत्स्थापयेच्छुचिं॥ तन्मंत्रेणातमभ्य
र्च्य रूपतत्रेष्टदेवतां॥ पूजयेद्धूपपुष्पैस्तां महाव्याहृतिभिस्ततः॥ हुत्वाव्यस्तसमस्ताभिरारूतीनां चतुष्टयं॥
अन्तैर्मूलेन जुहुयात्पंचविंशतिसंख्यया॥ पुनर्व्याहृतिभिर्हुत्वा मूलेनैवं नियोजयेत्॥ वह्निं विसृज्य देवाय
दद्याद्वासमनोदकं॥ तेजः संहृत्य देवास्य निर्गतं देववक्त्रतः॥ नैवेद्यांतं तदुच्छिष्टभोजने विनिवेदयेत्॥ विश्व
क्षेमनोहरहृक्षखंडेश्वरउमापतेः॥ विकर्तनस्य चंडांशुर्वक्रतुंडोगणोत्रितुः॥ तत्रैकरुच्छिष्टचांडाली स्मृताऽ

द्धिष्टभोजिनः॥ततोलवणमुत्तार्यकुर्याद्धारात्रिकंसुधीः॥अथोनिवेद्यतांबूलंस्तुयिछत्रचामरैः॥पठेद्देव
मनाभूत्वामाईश्लोकवनुस्मयां॥१४४॥वृद्धिःसवासनाल्हृप्तार्प्यरागमंगलाभिवा॥मनोवृत्तिर्विचित्रातिनृत्यरू
पेराकल्पिता॥१४५॥धनयोगीतरूपेराशाद्वाद्यप्रभेदतः॥छत्राणितवघ्राणिकल्पितानिमयाप्रभो॥१४६॥
सुसुमाणाध्वजरूपेराप्राणाधाश्चामरात्मना॥अहंकारोगजत्वेनवेगःस्वप्रोरथात्मना॥इंद्रियाराणपश्वरूपाः
णिशाद्वाधीरथवर्त्मना॥मनःप्रयत्नरूपेराबुद्धिःसारथिरूपतः॥सर्वमन्यत्तथाकृप्तेनवोपकरणात्मना॥श्लो
कामेनान्यठित्वामूलमंत्रमनन्यधीः॥यथाशक्तिजपित्वामंत्रेणाविनिवेद्येत्॥क्षिपन्नर्घस्यपानीयंदे
वतादक्षिणोकरे॥गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं॥सिद्धिर्भवतुमेदेवत्वत्प्रसादात्त्वयिस्थिता
॥कीर्तितःश्लोकरूपोयंमंत्रोजपनिवेदने॥दत्वापराङ्मुखंचार्घ्यंपश्चैःशरवंप्रपूजयेत्॥दंडवत्प्रणिप
त्येशंदेवंकुर्यात्प्रदक्षिणाः॥अजेशशक्तिगणपभास्कराणांक्रमादिमाः॥वेदाईचंद्रवृद्धिसंख्याश्चःस
र्वसिद्धयो॥कृत्वाब्रह्मार्पणाख्येनमज्जनात्मानमर्पयेत्॥इतःपूर्वंप्राणाबुद्धिदेहधर्माधिकारतः॥जाग्र
त्स्वप्नसुषुप्तेषुतस्यास्वमनसावहेत्॥वाचाहस्ताभ्यांपद्भ्यामुदरेणाशिश्नकेनथा॥मेषानंतान्चिनोयत्

स्मृतंयदुक्तंवयत्कृतं॥तत्सर्वंप्रोच्यब्रह्मार्पणाभवत्वश्विवल्लभा॥मांप्रतीयंचसकलंहरयेतेसमर्पयो॥
तारस्तत्सहितिप्रोक्तोब्रह्मार्पणामजुर्बुधैः॥प्रणावादिर्द्वाशीत्यर्णोदेवतात्मसमर्पयो॥संहारमुद्रयादेवंस
हरेद्धृदयेनिजो॥अन्यस्मिन्देवतेकार्यंगुहोहरिपरेबुधैः॥एवंसंपूज्यदेवेशंब्रह्मयज्ञंसमाचरेत्॥योगक्षे
मंततःकृत्वामध्याह्नेस्नानमाचरेत्॥स्मार्तंतांत्रंचपूर्वोक्तंसंध्यातर्प्यणमप्यथा॥संपूज्यपूर्ववद्देवंवैश्व
देवादिकंचरेत्॥देवप्रसादभुंजीतसंभोज्यब्राह्मणोत्तमां॥आचम्यदेवंसंस्मृत्यप्रणाभृत्कृतयासुधी
॥संध्याहोमंचनिर्वर्त्यदेवंसंपूज्यपूर्ववत्॥शयीतभुक्तशय्यायांभुक्तातांदेवतांस्मरेत्॥एवंयःपूजये
देवंत्रिकालंधर्ममाचरेत्॥नजातुवैरिभिःदुःखैःपीड्यतेहरिरक्षितः॥त्रिकालपूजनेशक्तैःकार्यंदिःसक्त
स्यहः॥विशेषणायजेद्देवंसंक्रांत्यादिषुपर्वसु॥दत्ताभिःपंचभिर्वापिपूजयेदुपचारकैः॥अशक्तःकारये
त्पूजांदद्याद्दर्शनसाधनं॥दानाशक्तःसमर्वत्रंपश्येत्तत्परमानसः॥साधनाभाविनीत्रासीदोवेधासौत
कीतथा॥आतुरीपंचधोक्तासौपूजासाकीर्त्यतेक्रमात्॥पूजासाधनवस्तूनामभावात्मनसैवया॥पू
जांभसावापूर्वदनसाधनाभाविनीतुसा॥त्रस्तःसंपूजयेद्देवंयथालब्धोपचारकैः॥मानसेवापिसावा

स्त्रीत्रेयासंपूर्णासिद्धिदा॥वास्वाक्ष्वाःत्रियोमूर्खाउवेधिास्तत्कृतानुया॥यथाज्ञानंसुरार्चासाहोवेधीकी
र्तितावुधैः॥स्नुतकीतुनरःस्नात्वाकृत्वासंध्यांत्वमाप्नुयी॥मनसैवार्चयेत्कामीनिःकामःसर्वमाचरेत्॥सोत
क्युक्तातुरोरोगैर्मुक्तायात्रवपूजयेत्॥विलोक्यमूर्तिंदेवस्यस्वास्वर्यमंडलां॥सकृत्सूलमनुंजप्त्वात
त्रपुष्पांविनिक्षिपेत्॥ततोरोगेगतेस्नात्वापूजयित्वाणसूद्विजान्॥पूजाविच्छेददोषोमेमास्तिवितिप्रा
र्थयेतताम्॥तेभ्यश्चशिष्यमाहायदेवेशंपूर्वव्रजेत्॥आतुरीकीर्तिताःपूजाःपंचैवंनारदोदिता॥स्व
यंसंपाद्यसर्वाणिश्रद्धयासाधनानियत्॥पूजयेत्तत्परोदेवंसलभेताखिलंफलं॥पूजनेनफलार्हस्यात्स्यद
तैरुक्तसाधनैः॥तस्मात्स्वयंसमानीयसाधनान्यवमंवरेत्॥देवपूजाविहीनोयःसमरोनरकेव्रजेत्॥य
थाकथंचिद्देवार्चाविधेयाश्रद्धयाततः॥ ॥इतिश्रीमेत्रमहोदधौपूजाकथनेद्वाविंशतितरंगः॥२२॥ ॥
वक्ष्यामोसर्वदेवानांपवित्रदमनार्पणं॥पवित्रैःआवरणोपूजांवैत्रैदमनकैरपि॥प्रत्यहंविधिवत्कार्यांहर्षा
र्थफलसिद्धये॥वैत्रेपूजेचतुर्दश्यांदमनैःपूजयेद्धरं॥नारायणंतुद्वादश्यामप्तम्यांगिरिनंदनं॥सप्तम्यांभा
स्करंदेवंचतुर्थ्यांगणनायकं॥एवंतत्तत्तिथौतंतंपवित्रैःआवरणोर्चयेत्॥पूर्वाह्णेदमनाहाहाकृत्वानित्या

र्चनंविभोः॥गत्वादमनकारामेगृह्णीयात्तंकयार्थणा॥उपविश्यसुखौदेशेमज्जनातेनचार्चयेत्॥अशो
कायनमस्तुभ्यंकामस्त्रीशोकनाशिने॥शोकार्तिहरमेनित्यंमानंदंजनस्वमे॥इतिसंप्रार्थ्यतत्रार्चेइतिका
मोस्वमंत्रतः॥कामदेवायकामाद्विहृदंतोष्टाक्षरोमनुः॥कामस्यमायारत्येहत्यंवासंस्करतेमनुः॥इष्ट
देवस्यपूजार्थंनेष्यामित्वामितिब्रुवन्॥उत्थायपंचगव्येनाभिषिंच्यक्षालयेज्जलैः॥गंधादिभिरुपाभ्यर्च
ह्यदयेस्मितवाससा॥निधायवंत्रापात्रेतंगीतवादित्रनिस्वनैः॥गृहमानीयसद्देशेस्थापयेद्देवतांस्मरन्
॥ततोदेवस्यपुरतःकृत्वाशुद्धलमंडलं॥सितकृष्णपीतरक्तवर्णैःसंपूरयेत्ततः॥भूपुरंतद्बहिःकृत्वा
पीतवर्णेनिपूरयेत्॥सितपीतरक्तवर्णैतद्बहिर्वर्तुलत्रयं॥रक्तवर्णेनतद्बाह्येविदध्याच्चतुरस्रकं॥एवंवि
रचितेरम्येमंडलेसर्वकामिकेः॥यस्त्वासर्वतोभद्रेमुंचेद्दसनभाजनं॥सायंकालेनपूजांतेकुर्यात्तस्याधिवा
सनं॥ताराद्याभ्यांकामरतिमंत्राभ्यांतत्रतोयजेत्॥स्त्रेयस्सुरत्याद्यानष्टौकामान्पृथग्दलैः॥कामोभस्म
शरीरश्चततोभंगश्चमन्मथः॥वसंतसखसंज्ञश्चस्मरइक्षुधनुर्धरः॥पुष्पबाणाइमेकामास्तायजेन्नामभि
र्निजैः॥प्रणवाभंगबीजाद्यैश्चतुर्थीहृदयान्वितैः॥कर्पूररोचनाभ्यंकंनाभिजाएरुकंकुमैः॥धात्रीफलै

श्रं स्नेन पुष्पैः कामाक्रमाद्यजेत्॥ हृमनं गंधपुष्पाद्यैरभिमंत्र्याभिमंत्रयेत्॥ अष्टोत्तरशतं कामगायत्र्या
मंत्रवित्तमः॥ कामदेवाय वरांतिविद्महे पुष्पबाणाय धीमहि तन्नो नंगः
प्रचोदयात्॥ इत्यादितिमनोभुवः॥ गायत्र्येषा बुधैरुक्ता जप्ताजनविमोहिनी॥ हृदा पुष्पांजलिं दत्वा मनुना
नेमनंनमेत्॥ ॐ नमोस्तु पुष्पबाणाय जगद्दानंदकारिणे॥ मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदायिने॥ ततो
भिमंत्रयेद्देवमनेनमनुनासुधीः॥ आमंत्रितोसि देवेश प्रातःकालेमयाविभो॥ कर्त्तव्यं तद्यथालाभं पूर्णं
पर्वतवाज्ञया॥ देवे पुष्पांजलिं दत्वा दंडवत्प्रणिपत्य च॥ हृमनेकर्मणास्त्रेण विदध्याद्धृमगुंठनं॥ रक्षणं
चक्रमाद्धृत्य दधिवासनमीरितं॥ ततो जागरणं कुर्याद्देवं गायन्नरुक्तवद्रजयन्॥ सद्योधिवासनं वापि
कुर्यात्तत्र न जागरः॥ प्रातःस्नानादिनिर्वर्त्य कृत्वा नित्यार्चनं विभो॥ संकल्प्य हृमनार्चायां विदध्याद्दे
वताज्ञया॥ गृहीत्वा हृमनस्याथ हस्ताभ्यां मंजरीं शुभां॥ हृदाभिमंत्रयेन्मंत्री ततः श्लोकमिमं पठेत्॥ तुंबु
रुरत्नमयीं दिव्यां सर्वगंधमयीं शिवां॥ गृहाणामंजरीं देव नमस्ते स्तु कृपानिधे॥ मूलमंत्रेण घंटां दिव्यां
घोषे देवस्य मस्तके॥ समर्प्य तां ततः कुर्यान्मालां हृमननिर्मितां॥ हृदाभिमंत्र्य चानेन श्लोकेनाप्यभिमं

त्रयेत्॥ ॐ सर्वरत्नमयीं नाथ हृमनीं वनमालिकां गृहाण देवपूजार्थं सर्वगंधमयीं प्रभो॥ मूलमंत्रं जपन्देव
मुकुटे तां समर्पयेत्॥ हृमनेनेष्टदेवस्य परिवारान्समर्चयेत्॥ ततो नैवेद्यतांबूलं दत्वा नत्वा च दंडवत्॥ मस्ना
वंकृतां तस्मै श्लोकेन विनिवेदयेत्॥ देवदेव जगन्नाथ वांछितार्थप्रदायक॥ कृत्स्नाभूरुयेमनाथ का
मान्कामेश्वरीप्रिया॥ जप्त्वा मूलमनुं वह्निं कृत्वा देवं विसृज्य च॥ गुरुं गत्वा हृमनकैर्यजेत्तं तोषयेद्धनैः॥ वि
प्रान्संभोज्य भुंजीत स्वदेवायनिवेदितं॥ एवं कृते कृतार्थः स्याद्दर्चाफलभाजनः॥ कथितो हृमनार्चैषा
पवित्रयजनं ब्रुवे॥ पवित्रयजनाहानि पूर्वस्मिन्वासरे सुधीः॥ विदध्यात्नित्यपूजांते पवित्राणि यथावि
धिः॥ हेमदुर्वर्णताम्रोत्थतंतुभिः पट्टसूत्रतः॥ यद्वा कर्पासिसूत्रेस्तु निर्मितैर्विप्रभार्यया॥ अन्ययावा
सधवया सद्वारप्रसक्तया॥ कर्त्तितैस्ताभिकुर्वीत नपंश्वल्यादिनिर्मितैः॥ त्रिगुणं त्रिगुणी कृत्य निर्मा
यं नवसूत्रिकां॥ तां प्रोक्ष्य पंचगव्येन शालये दुग्धवारिणा॥ प्रणवेनाभिषिंचेत मूलेनाष्टोत्तरशतं
॥ मंत्रयेन्मूलगायत्र्या तावद्देवं ततः सुधीः॥ रचयेन्नवसूत्रिभिरष्टोत्तरशतेन च॥ तद्दक्षिणतद्दक्षिणजानू
रुनाभिमात्रतः॥ देवेशस्य पवित्राणि श्रवौ देवेप्रसन्नधीः॥ ज्येष्ठमध्यकनिष्ठानि तेषु ग्रंथीन्दधीत स

॥षट्त्रिंशत्तत्वमौर्त्तंडमितास्त्र्येशादियुक्रमात्॥अष्टोत्तरसहस्रेणनवसूत्र्याविनिर्मिता॥अष्टो
त्तरशतग्रंथिवनमालापवित्रकं॥कृत्वातासूरंजयेद्ग्रंथी॥त्रोवनाकुंकुमादिभिः॥वेणादेपटलेतामि
संछाद्यमितवाससा॥स्थापयित्वाविनिर्मायाद्न्यन्यावरणावनि॥सप्रविंशत्यक्षिरविनवसूत्री
मितानितु॥अद्रिनेत्रमितामिस्तु कुर्याद्गुरुपवित्रकं॥तावतीभिः कुशानोसत्सद्विंशत्यातत्तात्म
नः॥तत्रग्रंथीत्रयथाशोभेद्त्वासंरंजयेद्रपि॥तामिपात्रंतरेन्यस्यकुर्याद्गंधपवित्रकं॥द्वादशग्रंथीति
ग्मांशुनवसूत्रीविनिर्मिता॥निर्मायैवंपवित्राणिकुर्यात्पूजार्थमंडलं॥पंकजंषोडशदलंपूरयेद्दस्त्व
रीकैः॥नीलहारिद्रशोणाश्मोजिष्ठश्वेतसंज्ञकैः॥सिंदूरपित कृष्णाख्येसद्वहिर्मंडलत्रयं॥सूर्यसोमा
ग्निसंज्ञंतन्मितपीतासरांक्रमात्॥तदा ह्येषुदलंकुर्याद्दरणांयद्विवासितं॥एवंमंडलमारच्यपूजयेत्कु
सुमादिभिः॥तस्योपरिनिवध्नीयाद्विताभंसमलंकृतं॥मंडलेस्थापयेद्देवप्रतिमांयद्विघटं॥तत्रेष्ट
देवंसंपूज्यपायसंविनिवेदयेत्॥देवतायेपवित्राणांपात्रेन्यस्याधिवासयेत्॥उक्तसंख्यसूत्रस्या
लाभेतानियथारुचि॥ज्येष्ठादीनिपवित्राणिविदध्यात्सर्वथासुधीः॥तत्रद्वाविंशतिंदेवानाह्वयप्र

तिपूजयेत्॥ब्रह्मविष्णुमहेशानीस्त्रिसूत्र्यादेवताःस्मृताः॥ॐकारचंद्रमोवह्निब्रह्मनागशिखिध्वजाः॥सू
र्यःसदाशिवोविश्वेनवसूत्र्यधिदेवताः॥क्रियाचपोडशीवीरावतुर्थीत्वपराजिता॥विजयाजयया
कामसुक्तिधवसदाशिवा॥मनोन्मत्तीतुनवमिस्तामीसर्वतोमुखी॥एताःपवित्रग्रंथीनांदेवताःपरिकी
र्त्तिताः॥आवहन्त्यादिसुताभिर्नवभिसाधकोत्तमः॥तदाकानादिकंतत्र कृत्वार्घ्यंदत्तादिभिः॥एवंप
वित्राणपभ्यर्च्यद्याद्गंधपवित्रकं॥तद्गृपयित्वातारेणहृस्येनाभिमंत्रयेत्॥प्रणम्यप्रार्थयद्देवंश्लोकयु
ग्ममिस्पठन्॥ॐआमंत्रितोसिदेवेशसार्द्धंदेव्यागणैश्वरैः॥मंत्रेशैर्लोकपालैश्चसहितःपरिचारकैः
॥आगच्छभगवन्नित्यविधिसंपूर्त्तिकारक॥प्रातस्त्वांपूजयिष्यामिसानिध्यंकुरुकेशव॥ततोगंधपवि
त्रंतत्पात्रस्योर्विन्यसेत्प्रभोः॥केशवेतिपदस्थानेकार्य्यंहोन्यदेवते॥भगवत्यांपदेस्त्रत्रलिंगंहोमंत्रवित्त
मैः॥अधिवासंविधायेत्थंनिशिजागरणंचरेत्॥देवस्यसूक्तिनामानिवस्त्रगायंश्चतद्गुणान्॥प्रातर्नि
त्यार्चनंकृत्वामूलेनाष्टोत्तरंशतं॥कनिष्ठाख्यंपवित्रंतु गृहीत्वाचाभिमंत्रयेत्॥घंटावाद्यैर्वेदनांकार
यत्घोषमद्भुतं॥जयशब्दांश्चदेवस्यकंठेमूलेनवार्पयेत्॥एवमेवार्पयेत्स्येपवित्रेमध्यमोत्तमे॥श्वेत

रक्तं क्रमात्पीठं ध्यायेद्देवं तदर्पणे॥ वनमालापवित्रं तन्नावन्मूलेन मंत्रितं॥ अर्पयेत्स्वदेवस्य मुकुटे मूलमु
च्चरन्॥ ततः सुवर्णकुसुमैः पुष्पैः शातमितैः सह॥ मूलाभिमंत्रितं देवमूर्द्ध्नि मूलेन चार्पयेत्॥ हृदाद्यपटलं
स्थानि पवित्राण्यभिमंत्र्य च॥ तत्तन्नाम्नानमोंतेन परिवारसुराभ्यजेत्॥ एवं पात्रैः संपूज्य धूपादीनि प्र
कल्पयेत्॥ पावके देवमावाह्य नित्यहोमं विधाय च॥ पुष्पांजलिं विधायेत्थं कर्मानेन निवेदयेत्॥ मंत्रहीनं
क्रियाहीनं भक्तिहीनं कृपानिधे॥ पूजनं पूरितामेतु पवित्रेणार्पितेन मे॥ इति संप्रार्थ्य देवेशं योजयेद्धृ
दयेन जे॥ गुरुं प्रति कृतं तोगत्वा दत्वा पुष्पांजलिं गुरौ॥ स्वांगेषडंगं विन्यस्य गुरोर्देहे पि विन्यसेत्॥ पाद्यं द
त्वा तथैवार्घ्यं वस्त्रालंकारवंदनं॥ पुष्पैः संपूज्य मूलेन पवित्रं तज्जलेर्पयेत्॥ स्वशक्त्या दक्षिणां दत्वा द
ण्डवत्प्रणमेद्गुरुं॥ अन्येभ्यः शिष्यबंधुभ्यः पवित्राणि दद्यात्तव॥ सर्वथैव गुरोः पूजा कर्तव्या मंत्रिणा सदा
॥ अपूजिते गुरौ सर्वा पूजा भवति निष्फला॥ गुरोरभावे तत्पुत्रं तदभावे तदात्मजं॥ शिष्यं तदभावे पूजयेत्
गुरुपौत्रजं॥ ततो धृत्वा पवित्रं स्वं भोजयित्वा द्विजोत्तमान्॥ भुंजीत तच्छेषतो बंधुभिस्तनयैः सह॥ य
थाकथंचित्कुर्वीत पवित्राणि सुरार्चने॥ विधेरुक्तस्य वा शक्त्या पूजासंपूर्त्तिहेतवे॥ यस्य कस्यापि तिथौ

कुर्यान्न तथा वुक्तेकृतं न वेत्॥ सर्वथा श्रावणे चैकमपि पत्रं तु निवेदयेत्॥ प्रत्यहं यः पवित्रेण पूजां कुर्वीत दैव
ते॥ ऐश्वर्यं शेषसंयुक्तो नैकवर्षाणि जीवति॥ संपूर्णं हायनं पूजा देवतानां कृता तु या॥ सर्वसंपूर्णतामे
ति पवित्रदमनार्पणात्॥ अन्येष्वप्युपरागार्द्धोदयसौम्यायनादिषु॥ कुर्यादिलभ्ययोगेषु विशेषाद्देवतात्रि
ने॥ यथा यथेष्टदेवेषु नृणां भक्तिः समेधते॥ प्राप्यते तैरयत्नेन मनोभीष्टं तथा तथा॥ अथोत्तरतः कुर्यी
द्ध्वजप्रस्थापनोत्सवं॥ ऊर्जे तथैव देवानामुत्थायनविधिं सुधीः॥ माघकृष्णचतुर्दश्यां विशेषाद्धि वपूजने
॥ आश्विनाद्यनवाह्येषु दुर्गापूजा यथाविधि॥ गोपालं पूजयेद्धि द्वात्रभः कृष्णाष्टमीदिने॥ रामं च त्रिषि
तेपक्षे नवम्यामर्चयेत्सुधीः॥ विशाखाद्यचतुर्दश्यां नरसिंहं प्रपूजयेत्॥ यजेच्छुक्लचतुर्थ्यां तु गणेशं त्रीभा
द्रमाघयोः॥ महालक्ष्मीं यजेद्धि द्वात्रभाद्रे कृष्णाष्टमीदिने॥ माघस्य शुक्लपंचम्यां विशेषाद्धि नभायकं
॥ यथाकथंचित्सप्तम्यां शुक्लारविवारयुतायां तु॥ तस्यां दिने त्रिसंपूज्य कुर्याद्दीर्घप्ररोहितं॥ तत्कल्ये दिनमा
नस्य देवतापीतिवर्द्धनात्॥ विशेषनियमान्ज्ञात्वा भजेद्देवमनन्यधीः॥ आषाढी कार्त्तिकी मध्ये कंचि
न्नियममाचरेत्॥ देवसंप्रीतये विद्वान्जपपूजादितत्परः॥ एवं यो भजते विष्णुं रुद्रं दुर्गां गणाधिपं॥

भास्करं श्रद्धया नित्यं सकृद्वा चिन्तयीत्तु ॥ स्वधर्मं आचरं नित्यं स्वेष्टजापरायणाः ॥ जितेंद्रियो विला
भोगाश्चाप्येहानंदतां व्रजेत् ॥ ८८ ॥ ॥ इति श्रीमहीधरविरचिते मंत्रमहोदधौ हनमपादिचार्वनिरूप
णनामत्रयोविंशस्तरंगः ॥ २३ ॥ ॥ साधकानां शीघ्रसिध्ये मंत्रशुद्धिमथो ब्रुवे ॥ साधकस्य तु नामादि स्वरां
मारभ्य शोधयेत् ॥ मंत्राद्यक्षरपर्यंतं वक्रे सिद्धादिकेक्रमात् ॥ जन्मर्क्षात्त्यं प्रसिद्धं वा नामर्क्षाद्यं विशो
धनो ॥ ऊर्ध्वगाः पंचरेखास्युः पंच तिर्यग्गता पुनः ॥ कोष्ठानि मंत्रजायंतेशोऽशो वात्र संलिखेत् ॥ भूरामाभ
वमं दाक्षिः वेदार्कद्विसाष्टभिः ॥ कलामनुशरैरद्रिमाथिविश्वेर्धर्मनेषुवः ॥ कोष्ठेषु मातृकावर्णान्मंत्रा
नामादितः क्रमात् ॥ सिद्धः साध्यः सुसिद्धारिर्जेयो मन्वक्षरावधिः ॥ यस्मिंश्च तुष्कनामार्णास्तस्मात्सिद्ध
चतुष्टयं ॥ प्राग्दक्षिणापात्तद्दक्षिणीयं साध्याख्यं तत्तृतीयकं ॥ सुसिद्धाख्यं चतुर्थं तु सपत्नाख्यं स्मृतं बुधैः
॥ एककोष्ठे द्वयोर्वर्णौ सिद्धसिद्धः प्रकीर्तितः ॥ तद्द्वितीयं मंत्रवर्णौ सिद्धसाध्यः उदाहृतः ॥ तृतीयं सिद्ध
सुसिद्धः सिद्धारिस्याच्चतुर्थकः ॥ नामार्णा यत्र कुष्ठेषु मन्वर्णाश्चेद्द्वितीयकः ॥ चतुष्कं तत्र पूर्वं तु यत्र
नामाक्षरं स्थितं ॥ तत्र तत्कोष्ठमारभ्य गणयेत्पूर्ववत्क्रमात् ॥ साध्यसिद्धः साध्यसाध्यस्तत्सुसिद्धश्च

तद्रिपुः ॥ तत्सुसिद्धोऽरिः पश्चाद्देवं मंत्रं विचारयेत् ॥ चतुर्थं तु चतुष्कस्यादरिसिद्धोरिसाधकः ॥ सिद्धसिद्धो
यथोक्तेन द्विगुणात्सिद्धसाधकः ॥ सिद्धसुसिद्धो द्विजपात्सिद्धारिर्हंति बांधवान् ॥ साध्यसिद्धो द्विगुण
पात्साध्यसाध्यो निरर्थकः ॥ द्विगुणाज्जपात्तत्सुसिद्धः सारिर्हंति गोत्रजान् ॥ सुसिद्धसिद्धो द्विजपात्तत्सा
ध्यो द्विगुणाज्जपात् ॥ तत्सुसिद्धो ग्रहादेव सुसिद्धारिः कुटुंबहा ॥ अरिसिद्धः सुतं हन्याद्दरिसाध्यस्तु कल
त्रकं ॥ एवं ज्ञेयं तृतीयेऽपि चतुष्के मंत्रवर्णकः ॥ तद्वत्पूर्वोक्तयारीणां क्रमाद्ज्ञेयं विचक्षणैः ॥ सुसिद्धसिद्ध
सत्साध्यस्तत्सुसिद्धश्च तद्रिपुः ॥ तत्सुसिद्धश्च तत्पत्नीघ्नस्तद्दरिः साधकायहः ॥ नाम्नो मंत्रस्य वर्णांश्च लिखि
त्वा प्रतिवर्णकं ॥ सिद्धादिगणना कार्या यावन्मंत्रसमापनं ॥ नाम्नो यदि समाप्तिः स्यात्तु नर्नामलिखेत्सुधीः
॥ एवं संशोधितेष्वस्मिन्भूरयः साध्यवैरिणः ॥ अल्पांसिद्धसुसिद्धाद्यैरुभयं तु क्रमात्तु भं ॥ मतमित्थं
तु केचिच्च विप्रप्राज्ञसंमतं ॥ अथवान्यप्रकारेण सिद्धादीनां विशोधनं ॥ द्वादशारं लिखेच्चक्रे वर्णान्पू
र्वोदितः क्रमात् ॥ गणयेत्सिद्धसाध्यादि फलं तेषां विनिर्दिशेत् ॥ सिद्धसिद्धमिकालेन साध्यस्तु जपहोमतः
॥ सुसिद्धः प्राप्तिमात्रेण साधकं भक्षयेदरिः ॥ सिद्धो नवकवर्गेषु साध्यो रसदिशादिषु ॥ सुसिद्धस्त्रि

मं·म
१२०
च·वि
मं
शो

मनीशेषु रिषुर्वेदाष्टभानुषु॥ सुधोपीतप्रकारोस्मिसिद्धसाध्यादिशोधने॥ ततः कोष्ठेषु विलिखेद्दाहिव
र्णान्पुनः पुनः॥ नामार्णान्सिद्धसाध्यादिज्ञेयं मन्वक्षरावधि॥ चतुर्थेपि प्रकारोस्मि सिद्धादिनां विशोधनं॥ नेत्रभू
गरागा वेदस्माधरानयनभूभुजाः॥ द्विचन्द्रभुजवाहूभिभूनेत्रत्रिधरागुणाः॥ एकैकभूभुजे द्वस्मिरामवंशावुद्भ
वया॥ अश्विन्यादिषु विज्ञेया आद्यवर्णाः क्रमाद्बुधैः॥ शीतांशुविसर्गौतु यौ ह्यभावे व्यवस्थितौ॥ जन्मसंप
द्विपक्षेमप्रत्यरिः साधकोवधः॥ मैत्रं परममैत्रं वुगरागानीयं स्वनामभाशा॥ विपद्वधः प्रत्यारिः श्चत्याज्योमन्यद्वद्ध
तमं॥ अथरार्धसंप्रदिः कथ्यते सिद्धिदायिनी॥ सप्रतिर्यग्लिखेद्वेरवाशस्त्रौ वर्द्धिगाः पुनः॥ एवं कृते तु जा
यंते कोष्ठाः षट्त्रिंशसंमिताः॥ आद्यपंक्तौ लिखेदंकांस्तेकथ्यंते यथाक्रमं॥ मन्नक्षत्रयुग्मार्कतिथिस
द्वेदवह्नयः॥ सार्यकावसवोनंदाः कोष्ठेषु क्रमतः स्थिताः॥ द्वितीयपंक्तौ संलेख्याः पंचदीर्घाजितीश्वराः॥
तृतीयपंक्तौ काधराः टकारांताः त्रिवेर्मिताः॥ ठादिफांताश्चतुर्थांतु पंचम्यां वादिहांतिमाः॥ षष्ठ्यां पंक्तौ
क्रमाद्वेरवाश्रंकाः काथ्यंतएवतो॥ दिक्कुंद्रप्रतिवेदाष्टगुणाश्चप्रेषु सागराः॥ रसाश्चरामसंख्याताएव
मंकाउदीरिताः॥ मैत्रवर्णान्पृथक्कुर्यात्स्वरव्यंजनरूपतः॥ कोष्ठेयावत्तिवर्णाः स्याद्गुणयेत्तावदंककं

रामः
१२०

॥ कोष्ठोपरिस्थेनांकेनसर्ववर्णेष्वयंविधिः॥ दीर्घाभरागा मंकाश्चज्ञेयाल घ्वक्षरास्थिताः॥ एकीकृत्यास्वि
लानंकानष्टभिर्विभजेत्पुनः॥ शेषांकोमंत्रराशिस्यान्नामवर्णेष्वयंविधिः॥ अथपंक्तिस्थितैरंकैर्गुणनीया
स्तुतेखिला॥ अधमर्णाधिकोराशिस्तेनोराशिर्धनीस्मृतः॥ मंत्रोयद्वाधमर्णाः स्यान्नद्याद्योधनीमतः॥ ए
वंधनर्णसंप्रोक्तमन्यथाध्रीव्यतेपुनः॥ नामाद्यक्षरमारभ्यपावन्मंत्रादिमाक्षरं॥ गणयेन्मातृकावर्णाक्र
मेणगणयेत्त्रिभिः॥ विभक्तेसप्तभिः शिष्टोनामराशीरुदीरितः॥ एवंमंत्रार्णमारभ्यपावन्नामादिमाक्षरं
॥ गणयित्वात्रिभिर्हत्वाविभजेत्सप्तभिः सुधीः॥ मंत्रराशिः स्मृतः शिष्टः पूर्ववद्धनितर्णिता॥ यद्वामंत्रा
क्षरार्णान्ह्रस्वव्यंजनरूपतः॥ पृथक्कृत्यद्विगुणयेद्योजयेत्साधकाक्षरैः॥ ताद्वारैरष्टभिर्भक्तेमंत्रराशि
रुदाहृतः॥ एवंनामार्णसंद्योपिद्विगुणीकृत्ययोजितः॥ मंत्रवर्णैरष्टभक्तोनामराशिः स्मृतोबुधैः॥ न
र्णाधनितावात्रपूर्ववत्प्रकीर्तिता॥ उक्तान्यतममार्गेणशोधमृणांधनांयोमंत्रः पूर्वजन्मर्षीसेवितो
भाद्रात्फलं॥ पापात्यापक्षयेजातेफलावाप्तिरनेहसि॥ आयुः क्षयाद्भतोनाशंत्राधकोस्वभवांतरे॥
क्षणीत्वात्प्राप्तिमात्रेणमंत्रोभीष्टंप्रयच्छति॥ समांकोयद्युभोराशिनक्षसंसेवनात्फलं॥ धनीमंत्रस्तसं

प्राप्तः फलत्यधिकसेवया॥ मंत्राणां शोधनेभ्यः प्रकारांतरमुच्यते॥ षट्कोणेषु लिखेत्पूर्वं कोणाद्यैकैकव
र्णकान्॥ अकारादिहकारांतान्नपुंसकविवर्जितान्॥ नामाद्यक्षरमारभ्य मंत्राणामभिशोधयेत्॥ प्रथमे संप्र
दांप्राप्तिर्द्वितये धनसंक्षयः॥ तृतीये धनसंप्राप्तिश्चतुर्थे बंधुविग्रहः॥ पंचमे तु भवेद्व्याधिः षष्ठे सर्वस्य संक्षयः
एवं संशोधितं मंत्रं दद्याच्छिष्याय मांत्रिकः॥ येषामनूनामसिद्धाद्विशोधनं नास्ति तान्नृवुवे॥ एकवर्णाद्त्रि
वर्णो वापंचार्णो रसवर्णकः॥ सप्तार्णो नववर्णश्च दशार्णो रुद्रनाक्षरः॥ अष्टार्णो हंसमंत्रश्च कूटो वेदाद्विनो
ध्रुवः॥ स्वप्रत्यक्षः क्षियाः प्राप्तो मालामंत्रो मृकेसरी॥ प्रसादो घोरविमंत्रश्च वाराहो मातृकापरा॥ त्रिपुराका
ममंत्रश्चाज्ञासिद्धः पक्षिनायकः॥ बौद्धमंत्राजैवमंत्रा नैषु सिद्धाद्विशोधनं॥ एतद्भिन्नेषु मंत्रेषु अधिरा
वस्य कीर्तता॥ विद्यामंत्रं सवंसस्कृमरिष्टं तत्यजेद्भवो॥ अरिमंत्रो गृहीतश्चेत्स्नानवशात्तस्तदा॥ तस्य त्या
गः प्रकर्तव्यस्तत्प्रकारो ब्रुवे॥ शुद्धिं स्थापयेत्कुंभं सर्वतोभद्रमंडले॥ विलोमं संजपेन्मंत्रं सूरयंत्रं
सुपाथसा॥ तत्र देवं समावाह्य यजेदावरणान्वितं॥ तद्ग्रे स्थंडिलं कृत्वा प्रतिष्ठाप्यान्त्रिलं तमः॥ जुहुयान्मू
लमंत्रेण विलोमेन शतं घृतैः॥ दिक्पतिभ्यो बलिं दद्यात्पायसान्नैर्घृतान्वितैः॥ पुनः संपूज्य देवेशं प्रार्थ

येन्मनुनामुना॥ आसुकल्यमभालोच्य मया त्वरबुद्धिना॥ वडपात्रं पूजितं त्वप्रभो मंत्रस्वरूपकं॥ तेन मेम
नसः क्षोभमशेषं विनिवर्तय॥ पापं प्रतिहतं त्वास्मद्भूयाद्भूयः समातनं॥ तनोतु मम कल्याणं पावनी भक्ति
रस्तु ते॥ एवं संप्रार्थ्य देवेशं कर्पूरागुरुचंदनैः॥ विलोमं विलिखेन्मंत्रं ताडपत्रे तदर्चये॥ प्रवध्य निजमूर्ध्नि
तत्रायात्कुंभस्थितैर्जलैः॥ पुनः संपूर्य तं तोयं तत्रस्थं मंत्रपत्रकं॥ संपूज्य कुंभं सरिति तडागे वा विनिक्षि
पेत्॥ विप्रान्संभोज्य मुच्येत पीडयासौ मनूत्थया॥ अनेकशोधनेचेत्तु दोषप्राप्यते मनुः॥ मायां कामं श्रि
यं वाद्यो दद्यात्तद्दोषमुक्तये॥ यत्तु कुशोमजप्रः सिध्येत्प्रणवसंपुटः॥ यत्तु क्रमोक्तमार्गेण प्रजप्तो व
र्णमालया॥ यत्र यस्य भवेद्भक्तिर्विशेषः समनूत्तमः॥ वैरिकोसुमपि प्राप्तो भीसृदः स्मस्य जायते॥ बीजमं
त्रास्तथा मंत्रा मालामंत्रा मिधापरे॥ त्रिधा मंत्रगणाः प्रोक्ता बुधैरागमवेदिभिः॥ बीजवर्णास्त्रवर्णाश्च
तो मंत्रा नरवादधि॥ विंशत्यधिकवर्णा ये मालामंत्रास्तु ते स्मृताः॥ बाल्ये वयसि सिध्यंति बीजमंत्रा उपासि
तुः॥ मंत्राभिधायो वनेतु मालामंत्राश्च वार्धके॥ उक्ता न्यस्या भवस्थायामभीष्टं प्राप्नुयेत्सुधीः॥ बीजमंत्रा
दिमंत्राणां द्विगुणं जपमाचरेत्॥ स्वकुलाम्यकुलाख्यो यमंत्राणां भेद उच्यते॥ प्रकृतिः पंचभूतात्मात

मं॰ म
१२२
चवि
म
ओ

तोजातानुमातृका॥तस्माद्वर्णास्त्रिपंचाशत्पंचभूतमयायथा॥तृतीयावर्गगाः कर्णाबोल्लाः पार्थिवा
मताः॥नासेऔवर्गतुर्यश्चवसोवर्णाः स्मृताअपां॥नेत्रेद्वितीयावर्गाणामैरक्षाः पावकात्मकाः॥वर्णा
द्यानंतरंटीत्राअयसामारुतामताः॥वर्गांतिमाः कपोलोत्रोहोविंदुश्चेतिनाभसाः॥विसर्गस्तुप्रकृत्यात्मा
सर्वभूतमयोयुतः॥प्राणोरितोविनियतिकंठादिस्थानमस्पृशन्॥पार्थिवादिकवर्णानां स्वकीयास्वकुला
भिधाः॥पार्थिवस्यनुवर्णस्यामित्रंवारुणमक्षरं॥तेजसंत्रात्रभूतंस्याद्वह्निमंतुमारुतौ॥जलोद्भवस्यव
र्णस्यपार्थिवंमित्रमीरितं॥सपत्नंवह्निसंभूतमुदासीनंतुवायवं॥तेजसस्याथवर्णस्यवायवंमित्रमुच्यते॥वि
द्वेषीवारुणोवर्णउदासीनस्तुपार्थिवः॥स्वनोत्थितवर्णस्यमित्रंवह्निसमुद्भवं॥शत्रुःपार्थिववर्णस्या
दुदासीनस्तुनोयजः॥वसुवर्णापार्थिवादीनांमाकाशार्णाः सखासदा॥मनोसाधकनाम्नोपियोवर्णायादि
मोतयोः॥स्वकुलादिकभेदस्तुबोध्योमंत्रप्रदिप्सता॥स्वकुलेभीप्सितासिद्धिःसिद्धिर्मित्रेपिकीर्तिता॥
अमित्रेमरणंरोगउदासीनेनकिंचना॥उदासीनममित्रंचमंत्रंहरेणवर्जयेत्॥स्वकुलंमित्रभूतंच
यहीयादिष्टकामकः॥नक्षत्रेकेपिसंप्रोक्तंस्वकुलेनाममंत्रयोः॥पुंस्त्रीनपुंसकाः प्रोक्तामनवस्त्रि

रामः
१२२

विधाबुधैः॥वषडंताःफडंताश्चपुंसासोमनवःस्मृतां॥वौषट्स्वाहांतगानार्यहुंनमोंतानपुंसका॥
वश्योच्चाटनरोधेषुपुमांसःसिद्धिदायकः॥क्षुद्रकर्मसुजानाशास्त्रीमंत्रोःशीघ्रसिद्धिदाः॥अभिचारे
स्मृताःस्त्रीवाःएवंमेमनवस्त्रिधा॥नक्षत्रसाधनेजन्मनक्षत्रमितरत्रतु॥शोधनेमंत्रिभिर्ग्राह्यंप्रसि
द्धंजन्मनामवा॥क्षत्रःसंशोधितोमंत्रोभवेद्राज्यसुसिद्धये॥छिन्नाद्यादिकदोषायेपंचाशन्मंत्रसंस्थि
ताः॥तेदेयिसकलाव्याप्तामनवःसप्तकोटयः॥अतस्तदोषशांत्यर्थंसंस्कारदशकंचरेत्॥भूर्यपत्रे
लिखेत्सम्यक्त्रिकोणंशोधनादिभिः॥वारुणंकोणमारभ्यसप्रधाविभजेत्समं॥एवमीशाग्निकोणाभ्यां
जायेतेतत्रयोमयः॥नवखेदमितास्तत्रविभिखेन्मातृकांक्रमात्॥अकारादिहकारांतामीशादिवरुणाव
धि॥देवींतत्रसमावाह्यपूजयेच्चरुनादिभिः॥तत्रसमुद्धरेन्मंत्रंजपमंतंतदीरितं॥जपोहसपुटस्यास्यमह
स्रंदीपमेस्मृतं॥नभोवह्निद्वयुक्तार्धिसंपुटस्यजपोमनो॥सहस्रपंचकमितोबोधनंतत्प्रतंबुधैः॥सहस्रं
तंजपेदस्त्रपुटितंताडनंतुतत्॥वाक्हंसमारैजप्तेनसहस्रंपाथसामनुं॥अभिषिंचेतवागाद्यैराभिषे
कोयमीरितः॥रुपिर्वृद्धांचितस्मारिवयडंतोध्रुवादिकः॥सहस्रंतत्पुटंजप्याद्विमलीकरणमनुं॥स्वधावष

मं म
१२३
च वि
मं
शो

टपुटं जप्यात्सहस्रं जीवनेमनुं॥ स्त्रीराज्ययुतपाथोभिस्तर्पयेत्तर्पयेन्मनुं॥ जपेन्मायापुटं मंत्रं सहस्रं गोप
नेस्थितः॥ वालातांत्रीयबीजेमगगनाघेनसंपुटं॥ सहस्रंप्रजपेन्मंत्रमक्षाप्यायनंमतं॥ संस्कारदशकंप्रोक्तं
मनूनांदोषनाशकं॥ सिद्धिप्रदाःकलियुगेयेमंत्रास्तान्वदाम्यतः॥ अर्णस्काक्षरोनुष्टुप्त्रिविधोमरके
सरी॥ एकाक्षरोऽजीनुष्टुप्द्विविधस्तुरगाननः॥ चिंतामणिः क्षेत्रपालोभैरवोयक्षनायकः॥ गोपालोगज
वक्त्रश्चवेटकायशिरीतथा॥ मातंगीसुंदरीश्यामाराकरणीपिशाचिनी॥ शवर्षैकजटावामाकालीनील
सरस्वती॥ त्रिपुराकालरात्रिश्चकलाविप्रप्रसाधिमो॥ अघोरोदक्षिणामूर्तिरुमामाहेश्वरोमनुः॥ हयग्री
वोवराहश्चलक्ष्मीनारायणस्तथा॥ प्रणावाद्याश्चतुर्वर्णाविहेमंत्रास्तथारवे॥ प्रणावाद्योगणपतिर्हरिद्रा
गणनायकः॥ सौरास्त्र्यक्षरमंत्रश्चतथारामयडक्षरः॥ मंत्रराजोक्रवाद्यश्चप्रणावोवैदिकोमनुः॥ वर्ण
त्रयायदातव्याएतेषूदायनोबुधैः॥ सहस्रनिःपाशुपतमाग्नेयास्त्रंनृकेसरी॥ वर्मद्वयायदातव्यानान्य
वर्मकदाचनः॥ छिन्नमस्तावृमातंगीत्रिपुराकालिकाशिवः॥ लघुश्यामाकालरात्रिर्गोपालोजानकीपतिः
॥ उग्रतारोभैरवश्चदेयावर्णावनुक्रमे॥ मृगीदृशांविशेषेणमंत्राएतेसुसिद्धिदाः॥ ब्राह्मणाःक्षत्रियोवैश्या

राम:
१२३

:शूद्रानार्योधिकारिणः॥ श्रद्धावंतोहेवगुरुद्विजप्रजासमर्वथा॥ मायांकामंश्रियंवाचंप्रदद्यान्मुखजन्मने॥
मायामृतेवाऽन्जेभ्यऽन्जेभ्यःश्रियंगिरं॥ वाणीवीजंनृभूदेभ्योन्येभ्योवर्मवदन्नमः॥ सर्वसाधारणमथहोम
द्रव्यमुदीर्यते॥ फलेक्षुतेःसुखावाप्तिःपालाशोरिसिद्धयः॥ हयमारोत्त्रियोवश्यागड्याराोगसंक्षयः॥
दूर्वयायुर्विवृद्धिःस्याद्धुडेनजनवश्यता॥ विल्वपत्रैर्घृतैःपद्मैःपाठलैश्चंपकैश्रियः॥ सिद्धार्थैर्मालिकाभिश्च
कीर्त्तयोजातिभिर्गिरः॥ व्रीहिभिश्चयवैःप्लक्षोदुंबराश्वत्थजेधसा॥ तिलैस्त्रिमधुरैरिष्टाःसंपदःस्युर्नृणांहु
तैः॥ किंशुकैःकासमर्दैश्चहुतमालैश्चपाटलैः॥ विप्राद्यःक्रमाद्वश्याःसौभाग्यंगंधवस्तुभिः॥ कोद्रवैर्व्या
धयोरिष्टासुव्रतत्वंविभीतकैः॥ कलायैःसाधसोत्पत्तिर्मधुकैस्तेषांनुमूकता॥ सुसिद्धिःशालिभिर्नाशोरिपूणा
मचिराद्भवेत्॥ किंशूरिष्टाद्दहाद्दीप्तेस्वेनासमुपासिता॥ परश्वरणएकस्मिन्हुतेजन्मांतरायतः॥ मंत्रोयदि
नसिद्धःस्यान्नहुतस्तुनरावरे॥ यद्वासमुद्रगामिन्यांनद्यांसिंदुरविग्रहे॥ स्यशन्मोक्षसाजप्यजुहुयान्नदृशा
दातः॥ विप्रान्संभोज्यनानान्नैर्मंत्राणांसिद्धिमाप्नुयात्॥ शाश्वज्जपपरस्यापिसिद्धंतिमानवोचिराद्॥ १२४॥
॥ इतिश्रीमन्महीधरविरचितेमंत्रमहोदधौमंत्रशोधनंनामचतुर्विंशतितरंगः॥ २४॥ ॥ कर्म्माणियडथो

वश्येसिद्धिप्रयोगतः॥ शांतिर्वश्यंस्तंभनंचद्वेषउच्चाटमारणं॥ उक्तानीमानिकर्माणि शांतिरोगादि
नाशनं॥ वश्यंवशकारित्वंस्तंभोवृत्तिनिरोधनं॥ द्वेषोऽप्रीतिः प्रीतिमतोरुच्चाटः स्थानतश्च्युतिः॥ मारणं
प्राणहरणमितियट्कर्मलक्षणं॥ देवतादेवतावर्णाक्षतुर्दिक्दिवसासनं॥ विन्यासामंडलंमुद्राभरंभू
तोक्ष्यःसमिद्॥ मालाग्निर्लेखिनद्रव्यंकुंडस्वकस्कवलेखनि॥ यट्कर्माणिप्रयुंजीतज्ञात्वैतानियथाथ्य
थं॥ रतिर्वाणीरमाज्येष्ठादुर्गाकालिचदेवता॥ सितारुणाहरिद्राभमिश्रश्यामलधूसराः॥ प्रपूजयेत्ताः
कर्मद्वेस्ववर्णैःक्रमुमेः क्रमात्॥ अनुयद्वंवसंताद्यमहोरात्रंभवेत्क्रमात्॥ एकैकस्यक्रमतोमनिंघटिका
दर्शकमतं॥ हेमंतंचवसंतारव्यंशिशिरंग्रीष्मतोयदो॥ शरदंकर्म्मयद्वेयोजयेत्क्रमतःसुधीः॥ शिवसो
मेंद्रनैऋतियवनाग्निस्थिरः क्रमात्॥ तत्तत्कर्माणिकुर्वीतजपंतत्तद्दिशामुखः॥ शुक्लपक्षेद्वितीयावसप्त
मीपंचमीतथा॥ तृतीयाबुधजीवाभ्यांयुताशांतिविधौमता॥ चतुर्थीनवमीषष्ठीत्रयोदशतिथीस्तथा॥ जी
वसोमयुताश्चावश्यीकरणकर्म्मणि॥ एकादशीवस्रमीनवमीवासप्तमीपुनः॥ शनैश्चरसितोयेताप्रोक्ता
विद्वेषणेशुभा॥ कृष्णेचतुर्दशसप्तम्योभानुसूनुयुतेयदि॥ उच्चाटनाख्यंकर्मात्रकर्त्तव्यंफलसिद्धयेभू

तास्तम्योहस्तगते अमावास्यातदंतगा॥ भानुमंदकुजोपेतास्तंभरणयोःशुभा॥ पद्मंस्वस्तिकविकटंकुक्कु
टंवज्रभद्रकं॥ शांत्यादिषुप्रकुर्वीतक्रमाद्दासमसूत्रमं॥ गोरवंगजफेरुणांमेषीमहिषयोस्तथा॥ कर
तोनिविशेषकुर्वीतजपंशांत्यादिकर्म्मसु॥ आसनान्येवमुक्तानीविव्यामःप्रोच्यतेधुना॥ यंथनंचयिदर्भाख्यः
संपुटोरोधनंतथा॥ योगःपल्लवसंतेषट्विन्यासाःकर्म्मसुस्मृताः॥ प्रत्येकमेषांयस्मांतुलक्षणंप्रणि
गद्यते॥ एकोमंत्रस्यवर्णास्यात्ततोनामाक्षरंपुनः॥ मंत्रोनामवर्णाश्चेन्येवंग्रंथनमीरितः॥ आद्योमंत्राक्ष
रद्वंद्वमेकंनामाक्षरंततः॥ एवंपुनःपुनःप्रोक्तोविद्वभिर्मंत्रवित्तमैः॥ मंत्रमाद्योसमुच्चार्यततोनामाखिलंपठे
त्॥ अंत्येप्युक्तमतोमंत्रमेवसंपुटईरितः॥ आदिमध्यावसानेषुनाम्नोमंत्रस्यरोधनं॥ नामांतेनुमनुर्योगोमंत्रां
तेनामपल्लवः॥ अर्द्धचंद्रनिभंपार्श्वद्वयेपद्मद्वयांकितं॥ जलस्यमंडलंप्रोक्तंप्रशस्तंशांतिकर्मणि॥ त्रिकोणं
स्वस्तिकोपेतंवश्येवह्निमंडलं॥ चतुरस्रंवज्रयुक्तंस्तंभेभूमंडलंशुभं॥ वृत्तंद्विसप्तद्विदलेविंदुयुक्तंकितंतुत
त्॥ वायुमंडलमुच्चाटेमारणेवह्निमंडलं॥ सरोरुहंपाशगदेमुद्रालंकुलियंत्वसि॥ यस्यमुद्राःकर्म्मयद्वेसु
रथहोमेनिगद्यते॥ मृगीहंसीशूकरीत्रिहोमेमुद्रात्रयंमतं॥ मध्यमानामिकांगुष्ठयोगेमुद्रामृगीरिताः॥ हंसीकनि

ष्टाहीनांसर्वासांयोजनेमता॥शूकरीकरसंकोचेमुद्रालक्षणमीरितं॥शांतौवश्येमृगीहंसीस्तंभनादि
षुशूकरी॥चक्रतोयधराकाशपवनानलवर्णिका॥षट्कर्मसुयंत्रस्थबीजाम्नुक्तानिमंत्रिभिः॥स्वराःसठो
वंद्रवर्त्मीशूनवर्त्मीउदीरिताः॥चंद्रार्त्महीनास्तेयास्यावश्यीकृत्यादिकर्मसु॥केचित्सवलहानर्यंरमाहु
स्तंद्राद्विर्त्मिकाः॥शांत्यादिकर्म्मसुज्ञेयाजातयःषडुसूःक्रमात्॥नमःस्वाहास्वधावौषट्हुंफट्स्वमंत्रवि
त्तमैः॥नासापुटद्वयाधस्ताद्यद्यप्राणगतिर्भवेत्॥तोयोदयास्तदाज्ञेयाःशांतिकर्म्मणिसिद्धिदः॥नासाद्वं
द्वाश्रितगतोप्राणोस्तंभेधरोदयः॥उरमध्यगतोतस्मिन्हृदयेव्योमोदयःशुभः॥पुटोपरिस्थाङ्गमनेप्राणोस्यात्पा
वकोदयः॥तद्वाकर्म्मद्वयेसिद्धिमारणेवशीकृतौ॥३४॥ ॥श्लोकपर्याप्तः॥प्राणोनिर्यगतोज्ञेयमु
च्चारेमारुतोदयः॥दुर्वायाःसमिधःशांतौघृतेनवसमन्विता॥दाडिमप्रसवाहोमेवश्येजाघृतसंयुताः॥मे
षीघृताक्ताःसमिधःस्तंभेराजतरूद्भवाः॥धत्तूरसमिधोद्वेषेतसीतैलेनसंयुताः॥द्रुमजाःकटुतैलाक्ताउच्चा
टनविधौशुभाः॥कटुतैलयुताःशस्तामारणेखदिरोद्भवाः॥शांखजापद्मबीजोत्थौनिंबारिष्टफलोद्भवा
॥प्रेतदंतभवावाहुरुदोत्थाखरदंतजा॥जपमालाक्रमाज्ज्ञेयाशांतिमुख्येषुकर्म्मसु॥मध्यमायांस्थिता

कुर्वतां॥शांतौवश्येरुद्रांशक्रंजलेतर्पणमीरितं॥मरिचाद्यंकमुद्रंतस्तंभनेमारणेतथा॥मेषरक्ताचितंतोयं
विद्वेषोच्चाटयोर्मतं॥स्वर्णपात्रंतर्पणेस्याच्छांतौवश्येचकर्म्मणि॥स्तंभनेमृत्तिकापात्रंविद्वेषेखदिरोद्भवं॥लोह
निर्मितमुच्चाटेकुक्कुटांडंतुमारणे॥मद्धामनेसमासीनःशांतौवश्येप्रतर्पयेत्॥जानुभ्यामुत्थितःस्तंभेद्वेषाद्ग
वेकपात्थितः॥षट्कर्म्मणांविधिःप्रोक्तस्त्वंमंत्रज्ञतत्त्वयोः॥संम्यक्कृत्वान्यासजातमात्मरक्षांविधायच॥
काम्यंकर्म्मप्रकर्तव्यंसम्यथाभिभवोभवेत्॥अभवाप्यशुभंवापिकाम्यंकर्म्मकरोतियः॥तस्यारित्वंव्रजेन्म
त्रोनतस्मात्तरपरोभवेत्॥विषयासक्तचित्तानांसंतोषायप्रकाशितं॥पूर्वाचार्यैर्हितंकाम्यंकर्मनतद्धितावहं॥
काम्यकर्म्मप्रसक्तानांतावन्मात्रंभवेत्फलं॥किंकामंभजतांदेवमखिलाभीष्टसिद्धयः॥प्रतिमंत्रंसमुद्दि
तायेप्रयोगाःसुखाप्रयः॥तद्वाशक्तिंविहायैवनिःकामोदेवताभजेत्॥वेदेकांडत्रयंप्रोक्तंकर्मोपासनबो
धनं॥साधनंकांडयुग्मोक्तंतृतीयेसाध्यमीरितं॥७७॥तस्माद्वेदोदितंकुर्याद्वुपासीतचदेवताः॥अंतःक
रणसंस्तेनलभतेज्ञानमुत्तमं॥कार्यकारणसंघातप्रविष्टःश्चेतनात्मकः॥जीवोब्रह्मैवसंपूर्णमितिज्ञात्वाविमु
च्यते॥मनुष्यदेहमासाद्यउपासितव्यदेवताः॥यन्नोमुच्येतसंसारान्महापापयुतोहिसः॥आत्मज्ञाना

प्रयेतस्माद्धातितव्यं नरोत्तमैः॥ कर्म्मभिर्दैवसेवाभिः कामाद्यरिगणाक्षयात्॥ चिकीर्षुर्दैवतोपास्तिं
माहोभाविविचारयेत्॥ स्नानसंध्यादिकं कृत्वा स्मृत्वा हरिपदांबुजं॥ शयीतकुशशय्यायां प्रार्थयेद्वृ
षभध्वजं॥ ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन॥ इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शांतः॥ नमो जयत्रि
नेत्राय पिंगलायमहात्मने॥ वामाय विरूपाक्षाय स्वप्नाधिपतये नमः॥ स्वप्नं कथय मे तथ्यं सर्वकार्य
विशोधनं॥ क्रियासिद्धिर्विधास्यामि त्वत्प्रसादान्महेश्वर॥ एभिर्मंत्रैः शिवं प्रार्थ्य निद्रां कुर्याच्चिराकुलः॥
स्वप्नं दृष्टं निशिप्रातर्गुरवे विनिवेदयेत्॥ तं मंत्ररेखामंत्रज्ञः स्वयं तत्र विचारयेत्॥ लिंगं चंद्रार्कयोर्वर्व
भारती जाह्नविशुभः॥ रक्ताश्वितरणं युद्धे जयो नालसमर्दनं॥ शिखिहंसरथांगाख्यरथेस्यां चमोहनं
॥ आरोहणं सारसस्य धनानीलाभ्रनिम्नगाः॥ प्रासादः स्यंदनं पद्मं छत्रं कन्याकुमः फली॥ नागो हीपो
हयः पुष्पं वृषभो स्थेश्वपर्वतः॥ सुरापलं ग्रहास्तारा नारी सूर्योदयोप्सराः॥ हर्म्यशैलविमानानामारो
होगगने गमः॥ मद्यमांसादनं विष्ठालेपोरुधिरसेवनं॥ [illegible] राज्याभिषेको गोद्विजध्वजाः॥
हंसः सिंहासनं शंखो वाद्यं रोचनादधि॥ चंदनं दर्पणाश्चैषां स्वप्ने संदर्शनं शुभं॥ तैलाभ्यक्तः कृष्णवर्णो